शास्त्री-II खण्ड साहित्य

रघुवंश महाकाव्यम्

त्रयोदशः सर्गः

Date __/__/____

प्र०(1)- ससत्वमादाय नदीमुखाम्भः सम्मीलयन्तो विवृताननत्वात् ।
अमी शिरोभिस्तिमयः सरन्ध्रैरूर्ध्वं वितन्वन्ति जलप्रवाहान् ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीरामः मत्स्याजलक्रीडायाः सीतां प्रति कथयति —

जनकतनये! एते तिमिनामानो मत्स्या मुखं विवृत्य जलजन्तु-सहितं जलमादाय स्वीयानि चञ्चुपुटानि सङ्घट्टयन्तः छिद्रसहितैः शिरोभिः जलप्रवाहान् ऊर्ध्वं क्षिपन्तीति भावः।

व्याख्याः- अमी = एते । तिमयः = मत्स्यविशेषाः । विवृताननत्वात् = व्यात्तमुखत्वात्, मुखं व्यावृत्य । ससत्वम् = मत्स्यादिजलजन्तु-सहितम् । नदीमुखाम्भः = सिन्धुमुखजलम् । आदाय = गृहीत्वा । सम्मीलयन्तः = सम्मीलनं कुर्वन्तः, चञ्चुपुटानि सङ्घट्टयन्तः । सरन्ध्रैः = सच्छिद्रैः । शिरोभिः = मस्तकैः । जलप्रवाहान् = सलिलस्रोतांसि । ऊर्ध्वम् = उपरिप्रदेशे । वितन्वन्ति = विस्तारयन्ति ।

Renu Devi
26/09/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

Page No. ____

उपशास्त्रीखण्ड साहित्य - तृतीय-पत्रम्
रघुवंश महाकाव्यम्
द्वितीयः सर्गः

Saathi

Date ___/___/___

प्र०(७)- तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥

उत्तरम्- प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके सिंहः राजा दिलीपं प्रति कथयति हे राजन्! बहोः कालात् अलब्धभोजनस्य व्रतिन इव मे परमेश्वरानुकम्पया उपस्थिता इयं गौः पारणा (व्रतान्तभोजनम्) भविष्यति। शिवाज्ञया अङ्कागतप्राणि भक्षणमेव मम जीविका विद्यते। राहोः चन्द्रसुधा यथा तृप्तिं जनयति तथैवेयमपि नन्दिनी मे तृप्तिं जनयिष्यति।

व्याख्या:- परमेश्वरेण= परमात्मना शिवेन, प्रदिष्टकाला=निर्दिष्ट भक्षणसमया, उपस्थिता = प्राप्ता, एषा = पुरोवर्तिनी गोरूपा, शोणितपारणा = रक्तात्मकं व्रतान्तभोजनम्, सुरद्विषः = राहोः, चान्द्रमसी =चन्द्रसम्बन्धिनी, सुधा= अमृतम्, इव = यथा, क्षुधितस्य =बुभुक्षितस्य, मे =मम तृप्त्यै = परितुष्टये, अलं= पर्याप्ता भविष्यतीति शेषः।

Renu Devi
26/09/20
राधा उमाकान्त सं०महावि०सुखसेना,
पूर्णिया ।

शास्त्री - I खण्ड साहित्य
अभिज्ञान शाकुन्तलम्

Date ___/___/___

सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते प्रियाप्रिया वा प्रमदा स्वबन्धुभिः ॥

उत्तरम् - प्रसंगः— प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके शार्ङ्गरवः तमेव लोकव्यवहारं निर्दिशति— ज्ञाति कुलैक संश्रयां भर्तृमतीं सतीमपि जनः अन्यथा विशङ्कते । अतः स्व बन्धुभिः प्रिया अप्रिया वा प्रमदा परिणेतुः समीपे इष्यते ज्ञातिकुलं = पितृ कुलं बान्धवगोत्रमेव एकः = केवलः संश्रयो यस्याः सा ज्ञातिकुलैक संश्रयां = पितृ गृहमात्रवासशीलां, बान्धवगृहवासिनीं वा भर्तृमतीं = सभर्तृकां, विद्यमान धवां, सधवां सुवासिनीम् सतीमपि पतिव्रतां साध्वीमपि जनः = लोकः अन्यथा = अन्यप्रकारेण असतीमिति विशंकते = सम्भावयति । अतः = अस्मादेव खलु कारणात् लोकापवादभयात् स्वबन्धुभिः = बन्धु-बन्धुभिः प्रिया = भर्तुरभिमता अप्रिया भर्तुरनभिमता वा प्रकृष्टो मदः = तारुण्यमदो यस्या सा प्रमदा = स्त्रीमात्रम् परिणेतुः = वोढुः, पत्युः समीपे = निकटे सान्निध्यौ इष्यते = वाञ्छ्यते प्रार्थ्यते । यत एवमतो लोकापवाद-भीषणा गुरुणा त्वयोपेक्षिता साध्वी तव धर्मपत्नीयं शकुन्तला त्वत्समीपं प्रापिता तदिदानीं धर्माचरणाय प्रतिगृह्यताम् । अत्राप्रस्तुत प्रशंसा काव्यलिङ्गानुप्रासालङ्कारा वंशस्थवृत्तञ्च ।

Renu Devi
26/09/20

रा धा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।